वा० ८ एवमनुभवः शुद्धांतःकरणैः संपादनीयस्तमाह एकेति ब्रह्मानुभवकांक्षिभिः मुमुक्षुभिः एक
द्वित्रिक्षणेन एवमनुक्रमेणाभ्यसनाद्विकल्पस्यांतःकरणवृत्तिमात्रस्य निरोधने अभ्यस्ते
अंतःकरणे निर्विकल्पके शुद्धचैतन्यस्वरूपानुभवो ज्ञानिनानुभवेन प्रकाशनेरित्यर्थः ॥ ५ ॥ ए
तदेव प्रतिपादयन्नाह सविकल्पकजीव इति गुरुशास्त्राद्युपदेशात् स्वेनेयं सविकल्पचैत का०

एकद्वित्रिक्षणेनैव विकल्पस्य निरोधने क्रमेणाभ्यस्यतां या
ताद्ब्रह्मानुभवकांक्षिभिः ॥ ५ ॥ सविकल्पकजीवोयं ब्रह्मस्या
न्निर्विकल्पके अहं ब्रह्मेति वाक्येन सोयमर्थोभिधीयते ॥ ६ ॥

न्यरूपो जीवः ज्ञानोपदेशसमये अहं ब्रह्मेति महावाक्यानुभवेन निर्विकल्पके शुद्धसच्चि चैतन्यरूपो
दानंदस्वरूपं ब्रह्मैव स्यात् सोयं अर्थ मुनिपुङ्गवैः प्रतिपादितोर्थः अस्मिन् ग्रंथेभिधीयते प्रति
पाद्यते यथा रज्जुः सर्पः रज्जुतिरिक्तो नास्ति एवं जीवोपि ब्रह्मव्यतिरिक्तो नास्तीत्येवं वेदा
न्तमर्यादेत्यर्थः ॥ ६ ॥ राम ॥

तदेव शुद्धचैतन्यात्मककूटस्थस्वरूपमुपमेन स्पष्टमुपपादयति मुक्ताभिरिति यथा मुक्ताभिरावृतं आच्छादि
तं सूत्रं मुक्तयोर्द्वयोर्मुक्ताफलयोर्मध्य इष्यते स्पष्टं भासते तथा विकल्पैर्बुद्धिवृत्तिभिरावृता आच्छादिता चित् कू
टस्थचैतन्यं विकल्पयोर्बुद्धिवृत्त्योर्मध्ये स्पष्टा सती प्रकाशते तदुक्तं विद्यारण्यश्रीपादैः संधयोर्विकल्प
वृत्तीनामभावाश्चावभासिना निर्विकारेण येनासौ कूटस्थ इति चोच्यते इति अतः बुद्धिवृत्तिसंधिषु साक्षि *पंचदश्यां च श्लोके २१*

मध्ये स्पष्टं भासते तथा

मुक्ताभिरावृतं सूत्रं मुक्तयोर्मध्य इष्यते तथावृता
विकल्पैश्चित्स्पष्टा मध्ये विकल्पयोः ९ नष्ट एव विक
ल्पे तु यावदन्यस्य नोदयः निर्विकल्पकचैतन्यं स्पष्टं ता
वद्विभासते १०॥राम

शुद्धचैतन्यानुभवो भवतीति भावः ९ किं च बुद्धिवृत्तिरूपे पूर्वविकल्पे नष्टे सति यावत् बुद्धिवृत्तिरूपस्या
न्यस्य विकल्पस्य उदयः आविर्भावः न भवति तावत्स्पष्टं निर्विकल्पकचैतन्यं शुद्धात्मस्वरूपं शुद्धं तद्व
दलत्वं विभासते निर्वृत्तिकमतः करणं शुद्धचैतन्यरूपेण कूटस्थेनानुभूयत इत्यर्थः अतएवोक्तं जा
गरेपि ह्रि यस्तस्त्वीभावः शुद्धेन भास्यत इति १० ॥ राम ॥

धि

गुरुणैवमुपादिष्टः शिष्यो ज्ञाननिष्ठो भूत्वा ज्ञानिनमशेषचेष्टानां स्पष्टमाचष्टे संभवे १ एवं तावद्गुरुणा परी
क्षार्थमादिष्टः शिष्यः प्रारब्धवशाद्बाधितानुवृत्त्या ज्ञानिनामपि सर्वव्यवहाराणामुपपत्तिं आत्मज्ञानी ज्ञानवशा
देवाह षड्भिः श्लोकैः हतेति हतेऽस्मिन्नात्मज्ञानोल्लसिते न हर्षं हन्तुं सोऽयमात्मज्ञस्य सर्वाधिष्ठानतया स्वात्मानं जानतः
अतएव धीरस्य विषयैरविदितमवितस्य भोगलीलया विषयभोगादिरूपया लीलया क्रीडया प्रारब्धवशात् स्व
तया खेलतः क्रीडतः संसारवाहीकैः संसाररज्जुनिपशुभिः मूढैः देहाद्यात्मवेदिभिः सह न हि समानता नैव
तुल्यत्वं तदुक्तं भगवता तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते इति १

°हतेरस्याश्चर्यं °हतेऽस्मिन्नस्य धीरस्य खेलतो भोगलीलया नहि संसारवाहीकैः मूढैः सह समानता १ ॥
°कांक्षंतः यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः अहो तत्र स्थितो योगी न हर्षमुपगच्छति २ ॥ नहि संगति
नयाज्ञाति तत्त्वस्य पुण्यपापाभ्यां स्पर्शो ह्यन्तर्न जायते न ह्याकाशस्य धूमेन दृश्यमानापि संगति ३

ननु संसारव्यवहारस्थो ज्ञानी कथं न संसारितुल्यः स्यादित्याशंक्य हर्षादिरहितत्वान्नैवं लक्षणमाह यत्पदमिति
अहो इति संबोधने हे गुरो यद्वा अहो आश्चर्यं शक्राद्याः सर्वदेवता अपि यत्पदं प्रेप्सवः यत्पदं प्राप्तुमिच्छन्तो
दीनास्तदप्राप्तितः शोच्याः वर्तन्ते तत्र सच्चिदानन्दाख्ये पदे स्थितः तत्त्वपदार्थैकत्वज्ञानी योगी
लब्धस्याहाकारो विषयलाभान्न हर्षं प्राप्नोति नापि तदपगमादुद्विग्नो भवतीत्यर्थः २ तत्त्वस्यैवं विषयस्य
किंकरत्वं वक्तुं पुण्यपापस्पर्शमाह तत्त्वस्येति तत्त्वपदार्थैकाभिन्नस्य पुण्यपापाभ्यां महान्तः करणे
धर्माणां स्पर्शः संबन्धो न जायते ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति स्मृतेः अत्र दृष्टान्तमाह न [illegible]

६

श्री॰
१२

ननु कर्मणि कृते कथं न उपादिसंस्पर्श इत्याशंक्य ज्ञानिनो विधिनिषेधानियम्यत्वमाह आत्मैवेति येन महात्म-
ना दृष्टं दृश्यमानं सर्वं जगत् आत्मैवेति ज्ञातं तेन ज्ञानिना यदृच्छया प्रारब्धवशादेव वर्तमाने प्रवर्तमाने को वचनेन क-
लापो निषेद्धुं प्रवर्तयितुं वा न समर्थो न कोऽपीत्यर्थः तदुक्तं शारीरिकभाष्ये अविद्यावद्विषयो वेद इति प्रवा-
धनीयुष्पवाः सौम्य प्राराजैर्वैवेटिभिरिति स्मृतिरपि ४ ननु ज्ञानिनोऽपि यदृच्छया प्रवर्तनो किं विच्छैवेच्छा-
निच्छयोः निवर्तयितुमशक्यत्वादित्याशंक्याह आब्रह्मेति यद्यपि ब्रह्माणमारभ्य स्तम्भपर्यन्तमिच्छानिच्छे
विवर्जयितुमशक्ये तथापि विज्ञस्यैवेच्छाद्वेषनिवर्तने सामर्थ्यमतो यदृच्छया प्रवर्तमानो ज्ञानी न विधिनियमस्य

आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना । यदृच्छया वर्तमानं तं निषेद्धुं क्षमेत कः ॥ ४ ॥
आब्रह्मस्तम्भपर्यन्ते भूतग्रामे चतुर्विधे । विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्जने ॥ ५ ॥
आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरं । यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित् ॥ ६ ॥
न ते संगोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि । संघातविलयं कुर्वन्नेवमेव लयं व्रज ॥ ७ ॥

र्थः ५ इत्युल्लासषट्केऽद्वैतज्ञानेन द्वैतज्ञानस्य बाधितत्वात् ज्ञानिनो भयहेतुः कोऽपि नास्तीत्युपसंहरति आत्मा-
नमिति आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरमिति कश्चित्सहस्रेष्वेक एव जगदीश्वरं तत्पदार्थं आत्मानं
त्वंपदार्थमद्वयमभिन्नं जानाति स यद्वेत्ति प्रारब्धवशाद्बाधितानुवृत्त्या इदं करवाणीति मनुते तत्करोति एवं कुर्व-
तस्तस्य कुत्रापि दिक्षु वा अत्र वा भयं नास्ति भयहेतोर्द्वैतज्ञानबाधितत्वादिति भावः ६ इत्यष्टावक्रमुनिविरचितेऽष्टा-
स्मणास्ते शिष्यप्रोक्तानुभवोल्लासषट्कविवरणं नाम चतुर्थं प्रकरणं ४ एवमुल्लासषट्केन स्वशिष्येणापि परीक्षिते
गुरुर्हेयोपदेशार्थं लययोगमथाब्रवीत् १ एवमुल्लासषट्केन शिष्येण परीक्षिते सति उत्तरेष्टोपदेशार्थमाचार्यो

भौदादिभिर्वि-
धनीयः

चित्तवासनया समो- तव

उपनिषद्

ऐतरेयारण्यकगते ।१ बृहदारण्यकोपगतस्य ।२ छान्दोग्योपनिषद्गतस्य ।३ अथर्ववेदगतस्य ।४

प्रज्ञानं ब्रह्म ।१ अहं ब्रह्मास्मि ।२ तत्त्वमसि ।३ अयमात्मा ब्रह्मेति ।४

वा॰ ६

ग्रंथाभ्यासफलमाह देहात्मधीवदिति यथा देहात्मबुद्धिर्दृढतरास्ति तथा ब्रह्मात्मबुद्धिर्दार्ढ्ये सति कृतकृत्य इत्यर्थः तदुक्तमुपदेशसाहस्र्यां देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यत इति एवं यदा तदायं ध्रियतां पंचभूतात्मकं देहकंचुकं परित्यज्यापरिच्छिन्नब्रह्मस्वरूपेण तिष्ठतु एवं भूतावस्थैव विदेहमुक्तिरित्यर्थः आत्मलाभान्न परं विद्यत इति ब्रह्मविद्दृढेनैव भ

देहात्मधीवद्ब्रह्मात्मधीदार्ढ्ये कृतकृत्यता यदा तदायं म्रियतां मुक्तोऽसौ नात्र संशयः ॥ १८ ॥ इति श्रीमच्छंकराचार्यविरचितं लघुवाक्यवृत्त्याख्यप्रकरणं संपूर्णम् शुभम्

वति भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ग्रंथान्तयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीत्यादिश्रुतयः आत्मविदः अनर्थहानिमानन्दस्वरूपप्राप्तिं च प्रतिपादयन्तीत्यर्थः ॥ १८ ॥ कृता पुष्पांजलिटीका भगवच्चरणाब्जयोः गुणैर्मयार्जितं किंचित्तद्ब्रह्मणि समर्पितं ॥ इति श्रीलघुवाक्यवृत्तिटीका पुष्पांजल्याख्या समाप्तम् शुभं ॥ सं १९८० मा-२-

ग्रह्णालुः मुमुक्षुः स्वस्यात्मनः ब्रह्मतां बुद्धिवृत्तिभिरात्माकारकारिताभिरंतःकरणवृत्तिभि
वा॰ ५ श्चिंतयेत् स्वीयं ब्रह्मत्वमात्माकारांतःकरणेन ज्ञानीयादित्यर्थः एवं यथावदनुसारेण वाक्य
वृत्त्या वाक्यवृत्तिग्रंथालोचनेन यद्वा महावाक्यवृत्त्या स्वस्य ब्रह्मत्वमेकाग्रतया तावत्सदाभ्यस्य
तीत्याह प्रमेयामृते ततः कालं नयेद्वेदांतचिंतयादयानां वसरं किंचित्कामादीनामनागपि इति वचना
॥

ग्रह्णालुर्ब्रह्मतां स्वस्य चिंतयेद्बुद्धिवृत्तिभिः वाक्यवृत्त्या यथाशक्ति ज्ञात्वा तावत्सदाभ्यस
तां सदा ९८ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं वि
दुर्बुधाः ९॥ यच्चिंतनमिति मनसा विषयीकर
तु ९९ तदेवाभ्यासस्वरूपं दर्शि
णं ब्रह्मणः एवं चिंतनं तस्यैव कथनं वेदांतवाक्यजातेन तस्यैवान्योन्यप्रबोधनं
प्रकारः एतदेकपरत्वं शुद्धचैतन्यैकपरतास्तां तेन तमेवैकं जानथ आत्मानमन्या वाचो वि
दिति॰ मुंचथामृतस्यैष सेतुः श्रुतेः एतत्सर्वं ब्रह्माभ्यासलक्षणमाचार्यैः प्रतिपादितमित्यर्थः ९

५

किंच सविकल्पकचैतन्यरूपोपि जीवः निर्वृत्तिकेऽन्तःकरणेऽभ्यासवशात्कृते सति निर्विकल्पकं शुद्धबोधस्वरूपमेकमखण्डं ब्रह्मैव भवति अतः स्वतःसिद्धाः विकल्पा अन्तःकरणवृत्तयः प्रयत्नतः स्वस्वख्यातिनिरसनेन निरोद्धव्याः वृत्तिरहितेऽन्तःकरणे शुद्धचैतन्यस्वरूपमनुभूयते अतः वृत्तिरहितमन्तःकरणं कृत्वात्मस्वरूपमखण्डमनुभूयतामित्यर्थः २७ तदेवोपपादयति प्राकाइति

सविकल्पकचिद्रूपोहं ब्रह्मैकं निर्विकल्पकं स्वतःसिद्धा
विकल्पास्ते निरोद्धव्याः प्रयत्नतः २८ प्राक्तः सर्वनिरोधश्चेत्स
माधिर्ज्ञानिनां प्रियः तदशक्तौ क्षणं हठात् हृदया ब्रह्मतात्मनः २९

यदि सर्ववृत्तिनिरोधः शक्यो भवेत्तर्हि ज्ञानिनां वसिष्ठादीनां प्रियः इष्टः समाधिरेव स्यादतस्तदशक्तौ सर्वदान्तःकरणवृत्तिनिरोधासामर्थ्ये सति क्षणं हठात् क्षणमात्रमपि वृत्तिनिरोधं कृत्वात्मनः ब्रह्मता हृदया अनुसंधेया तथा च श्रुतिः यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्च न विचेष्टते तामाहुः परमां गतिं तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणां अप्रमत्तस्तदा भवति योगो हि प्र

[illegible] ५

वे॰ सं॰ १

श्रीगणेशाय नमः ॐ श्रीमद्गुरोः पादयुगेन ज्ञानस्य प्रसादतः वेदांतसंज्ञाः प्रत्येकं निरूप्यंते यथामतिः १ अध्यारोपा
पवादाभ्यां निष्प्रपंचं प्रपंच्यते ज्ञानमवस्तुन्यवस्त्वारोपः वस्तु सच्चिदानंदात्मकं ब्रह्म १ अवस्तु अज्ञानादिसकलजडस
मुदायः स्वरूपमहाप्रपंचः प्रपंचद्वयं १ अज्ञानद्वयं २ सूक्ष्मशरीरद्वयं ३ स्थूलशरीरद्वयं ४ शक्तिद्वयं ५ निःश्रेय
सद्वयं ६ संशयद्वयं ७ असंभावनाद्वयं ८ विपरीतभावनाद्वयं ९ प्रज्ञाद्वयं १० समाधिद्वयं ११ ब्रह्मत्रयं १२ जी
वत्रयं १३ शरीरत्रयं १४ अवस्थात्रयं १५ करणत्रयं १६ कर्मत्रयं १७ पुण्यकर्मत्रयं १८ पापकर्मत्रयं १९ मिश्रक
र्मत्रयं २० प्रारब्धत्रयं २१ प्रतिबंधत्रयं २२ संबंधत्रयं २३ तापत्रयं २४ अधिभूतादित्रयं २५ कारणत्रयं २६ गु
णत्रयं २७ कालत्रयं २८ ऋणत्रयं २९ ज्ञात्रादित्रयं ३० प्रपंचत्रयं ३१ लोकत्रयं ३२ ज्ञानप्रतिबंधकत्रयं ३३ वा
सनात्रयं ३४ श्रवणादित्रयं ३५ ज्ञानादित्रयं ३६ देहादित्रयं ३७ प्राणायामत्रयं ३८ अध्यात्मादित्रयं ३९ ता
दात्म्यत्रयं ४० एषणात्रयं ४१ लक्षणादित्रयं ४२ वर्तमानप्रतिबंधचतुष्टयं ४३ पुरुषार्थचतुष्टयं ४४ श
ब्दप्रवृत्तिनिमित्तचतुष्टयं ४५ वर्णचतुष्टयं ४६ आश्रमचतुष्टयं ४७ साधनचतुष्टयं ४८ अनुबंधचतुष्टयं
४९ अंतःकरणचतुष्टयं ५० संकल्पादिचतुष्टयं ५१ वेदचतुष्टयं ५२ प्रमाणचतुष्टयं ५३ विघ्नचतुष्टयं ५४
मैत्र्यादिचतुष्टयं ५५ भूतग्रामचतुष्टयं ५६ ब्रह्मविदादिचतुष्टयं ५७ कोशपंचकं ५८ ज्ञानेंद्रियपंचकं ५९
शब्दादिपंचकं ६० कर्मेंद्रियपंचकं ६१ वचनादिपंचकं ६२ प्राणादिपंचकं ६३ उपवायुपंचकं ६४ कर्मपं
चकं ६५ सूक्ष्मभूतपंचकं ६६ स्थूलभूतपंचकं ६७ यमपंचकं ६८ नियमपंचकं ६९ भूमिकापंचकं ७०
मलयपंचकं ७१ भ्रमपंचकं ७२ निवर्तकदृष्टांतपंचकं ७३ दृष्टांतपंचकं ७४ ख्यातिपंचकं ७५ समाधि
षट्कं ७६ अरिषड्वर्गः ७७ षड्भावविकाराः ७८ षट्कौशिका ७९ षडूर्मयः ८० षडिंद्रियलिंगानि ८१

षड्वस्थाः ८२ षट्शास्त्राणि ८३ षट्सूत्राणि ८४ षडंगानि ८५ षट्कर्माणि ८६ षट्प्रमाणानि ८७ शमादिषट्कं
८८ सप्तावस्था ८९ सप्तचैतन्यानि ९० भूरादिसप्तकं ९१ अतलादिसप्तकं ९२ सप्तभूमिकाः ९३ पुर्यष्टकं ९४
प्रकृत्यष्टकं ९५ अष्टांगानि ९६ अष्टांग ९७ नवविधिसंसारः ९८ देवतापंचदशकं ९९ अवस्थादिपंचदश
कं १०० नाडचादिषोडशकं १०१ षोडशकलिंगं १०२ सप्तदशकलिंगं १०३ नवदशकलिंगं १०४ चतुर्विंशतित
त्वानि १०५ षट्त्रिंशत्तत्त्वानि १०६ षण्णवतितत्त्वानि १०७ परमहंससंन्यासद्वयं १०८ विद्वत्संन्यासद्वयं १०९ निग्र
हद्वयं ११० अहंकारद्वयं १११ आनन्दत्रयं ११२ कर्मत्रयं ११३ जाग्रत्त्रयं ११४ स्वप्नत्रयं ११५ सुषुप्तित्रयं ११६ आत्म
त्रयं ११७ संन्यासचतुष्टयं ११८ भूमिकाचतुष्टयं ११९ मुक्तिचतुष्टयं १२० अजिह्वादिषट्कं १२१ मौनादिसप्तकं
१२२ नाडिकादशकं १२३ नाडीस्थानदशकं १२४ अष्टांतरंगमदाः १२५ षड्बहिर्मदाः १२६ अष्टमूर्तिम
दाः १२७ अष्टपाशाः १२८ सुखसाधनानि १२९ सप्तव्यसनानि १३० षड्भ्रमाः १३१ पंचक्लेशाः १३२ आध्यात्मिका
तापद्वयं १३३ स्वर्गलोकसाधनत्रयं १३४ भक्तसप्तगुणाः १३५ रूपषट्कं १३६ स्पर्शचतुष्टयं १३७ शब्दद्वयं १३८
रसषट्कं १३९ गंधद्वयं १४० भैरवीः १४१ पश्यन्त्यादिषट्कं १४२ उन्मन्यादिषट्कं १४३ नादादित्रयं १४४ इत्येताः
सत्ताः शास्त्रे ... प्रत्येकं निरूप्यन्ते सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि
अहमज्ञः मोहित इत्यनुभवबलात् भावरूपं व्यपदेशरूपमज्ञानं मूलकारणानां सत्त्वरजस्तमोगुणानां साम्या
वस्थारूपत्वाच्च ... अव्यक्तं महाप्रकृतिः कूटवन्निर्विकारेण तिष्ठतीति कू
टस्थज्ञानं विज्ञानेन ... पिधानादिरूपेण स्थूलसूक्ष्मकारणप्रपंचानां समष्टिः महाप्रपंचः वाह्यप्रपंच
आन्तरप्रपंच इति प्रपंचद्वयं १ पृथिव्यादिपंचभूततज्जन्यब्रह्माण्डतदन्तर्भूतोपर्युपरिविद्यमानभूर्भुवःस्वर्मह

११

अत एव समष्टिः स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते व्यष्ट्यज्ञानं जीवोपाधि इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना।
विद्याहंकारादिकारणत्वात्कारणशरीरमानन्दप्रचुरत्वादेव हेतोः कोशवदात्मनमाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिः

वे॰ सं॰ २ जनस्तपः सत्यनामकाः ऊर्ध्वा विद्यमानाः अतलवितलसुतलतलातलमहातलरसातलपातालनामकाश्चतुर्दशभुवनानि
त्रिसजरायुजाण्डजस्वेदजोद्भिज्जचतुर्विधभूतग्रामसमुदायः यथायोग्यं विविधनामरूपगुणधर्मशालित्वा
त्प्रपंचः बाह्यप्रपंचः २ अन्नमयादिपंचकोशशरीरादित्रयं जायते अस्तीत्यादिषड्भावविकारा उच्छ्वासादिषट्
कोशिकाः अशनपिपासादिषडूर्मिः श्रोत्रादिज्ञानेन्द्रियपंचकं वागादिकर्मेन्द्रियपंचकं प्राणादिवायुपंचकं
तद्व्यापाराः मनआद्यन्तःकरणचतुष्टयं संकल्पाद्यन्तःकरणवृत्तिचतुष्टयं जाग्रदादिअवस्थात्रयं तदभिमा
निविश्वतैजसप्राज्ञाः समाधिसुषुप्तिमरणत्रयं कामक्रोधादिषड्वर्गसाधनचतुष्टयं सत्त्वादिगुणत्रयं सुखदुः
खज्ञानाज्ञानपंचक्लेशशमादिचतुष्टयं यमाद्यष्टांगानि प्रत्यक्षादिप्रमाणचतुष्टयं रोगारोग्यादिसमुदायः यथा यं
योग्यं विविधनामरूपगुणधर्मशालित्वादयं आन्तरप्रपंच इति विवेकः २ समष्ट्यज्ञानं व्यष्ट्यज्ञानमित्युक्तानद्व
यं २ अज्ञानस्य समष्ट्यभिप्रायेणैकत्वव्यपदेशः व्यष्ट्यभिप्रायेणानानात्वव्यपदेशः समष्ट्यज्ञानमीश्वरोपाधि
उत्कृष्टोपाधितया विशुद्धसत्त्वप्रधानस्वरूपा माया अखिलकारणत्वात्कारणशरीरं आनन्दप्रचुरत्वात्कोश
वदात्मनः आच्छादकत्वाच्चानन्दमयः कोशः सर्वोपरमत्वात्सुषुप्तिः अत एव व्यष्टिः स्थूलसूक्ष्मशरीरलयस्था
नमिति चोच्यते समष्टिसूक्ष्मशरीरं व्यष्टिसूक्ष्मशरीरमिति सूक्ष्मशरीरद्वयं २ अखिलसूक्ष्मशरीरमेकबुद्धि प्राय
विषयत्वेन वनवज्जलाशयवद्वा समष्टिः अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिश्च भवति अखिलसूक्ष्म
शरीरं हिरण्यगर्भोपाधिः प्राणमयादिकोशत्रयं [illegible] नात्स्वप्नः अत एव समष्टिः स्थूलप्रपंचलय
[illegible] अनेकबुद्धिविषयतया स्थूलप्रपंचोपेतया सूक्ष्मतया च व्यष्टिसूक्ष्म
स्थानमिति चोच्यते [illegible] जाग्रद्वासनामयत्वात्स्वप्नः अत एव व्यष्टिः स्थूलप्रपंचलयस्था २
शरीरं तैजसोपाधिः प्राणमयादिकोशत्रयं

जाग्रद्वासनामयत्वात्स्वप्नः अत एव समष्टिः स्थूलप्रपंचलयस्थानमिति चोच्यते अखिलसूक्ष्मशरीरं २

नमिति चोच्यते समष्टिस्थूलशरीरं व्यष्टिस्थूलशरीरमिति स्थूलशरीरद्वयं ४ जरायुजांडजस्वेदजोद्भि
ज्जात्मकं चतुर्विधं सकलं स्थूलशरीरं वनवज्जलाशयवद्वा एकबुद्धिविषयतात्स्थूलशरीरापेक्षया स्थूल
त्वाच्च समष्टिस्थूलशरीरं विराडुपाधिः अन्नविकारत्वात्कोशवदात्मनः आच्छादकत्वाच्चान्नमयः कोशः
स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते एकैकं चतुर्विधं स्थूलशरीरं सकलं वृक्षवज्जलवद्वा अनेकबुद्धिवि
षयतया स्थूलशरीरापेक्षया स्थूलत्वान्नतया च व्यष्टिस्थूलशरीरं विश्वोपाधिः अन्नविकारत्वाद्धेतोरेवा
त्मनः कोशवदाच्छादकत्वाच्चान्नमयः कोशः स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते २ आवरणशक्ति
विक्षेपशक्तिरिति शक्तिद्वयं ५ अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोर्भेदं वा स्वात्मावलोकयन्तद्बुद्धिम
खंडसच्चिदानंदस्वरूपं वा आवृणोतीत्यावरणशक्तिः १ विविधस्वरूपेण भवनं विक्षेपशक्तिः २ अनर्थ
निवृत्तिरानंदावाप्तिश्चेति निःश्रेयसद्वयं ६ प्रमाणगतसंशयः प्रमेयगतसंशयश्चेति संशयद्वयं ७ तयोर्दि
श्रुतिभिः कर्म वा प्रतिपाद्यते उत सिद्धं ब्रह्म प्रतिपाद्यते इत्येवंरूपा चित्तवृत्तिः प्रमाणगतसंशयः १ ब्रह्म जगत्का
पादा रणं उत प्रधानादिकमित्येवंरूपा चित्तवृत्तिः प्रमेयगतसंशयः २ प्रमाणगतासंभावना प्रमेयगतासंभा
वना चेत्यसंभावनाद्वयं ८ ब्रह्मणः सिद्धत्वात्प्रत्यक्षादिवत्प्रमाणान्तरगम्यत्वेन श्रुतिः सिद्धब्रह्मप्रतिपादिका
कथं भवेत् फलाभावान्न भवत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रमाणगतासंभावना १ ब्रह्मणो जगद्
विलक्षणत्वेन स्थितत्वाज्जगत्कारणत्वं कथं संभवति न संभवत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रमेयगतासं
भावना २ प्रमाणगतविपरीतभावना प्रमेयगतविपरीतभावनेति विपरीतभावनाद्वयं ९ ब्रह्मणः सिद्धत्वेन श्रु
तीनां तत्प्रतिपादकत्वे निष्फलत्वप्रसंगात् श्रुतयः कर्मपरा एवेति निश्चयः प्रमाणगतविपरीतभावना १

वे॰सं॰ २

तंतुपटयोः कार्यकारणयोः सारूप्यं दृश्यते अतो जगद्ब्रह्मणोः सारूप्याभावाज्जगत्कारणं प्रधानादिकमेवेति नि-
श्चयः प्रमेयगतविपरीतभावना १ एवमात्मत्वेन यदि जगदंतःपाति निमित्तमपि जगद्विलक्षणं ब्रह्म तन्ममास्ति वा न
वेति प्रत्यगात्मविषयकः संशयः १ कर्तृत्वाद्यनेकधर्मविशिष्टस्य मम अकर्तृ तद्ब्रह्मस्वरूपत्वं कथं भवेत् न भ-
वत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रत्यगात्मविषयका संभावना २ यद्यकर्तृ हि नहि कथं मम शास्त्रे त्वया
कर्मकर्तव्यमिति कर्मोपदेशः अतः कर्तेति निश्चयात्मिका चित्तवृत्तिः प्रत्यग्विषयिणी विपरीतभावना ३ स्थि-
तप्रज्ञास्थितप्रज्ञेति प्रज्ञाद्वयं १० संप्रज्ञातसमाधिरसंप्रज्ञातसमाधिश्चेति समाधिद्वयं ११ एकमेवाद्वितीयं ब्र-
ह्म समष्टिस्थूलसूक्ष्मकारणशरीरोपाधिकतया विराड्हिरण्यगर्भ ईश्वर इति चोच्यते एतदेव ब्रह्मत्रयं १२
ब्रह्म ईश्वरः साक्षी परमात्मा कूटस्थः अखंडं जगदधिष्ठानं जगन्निषेधावधिभूतं च व्यवह्रियते वेदान्तेषु बृंह-
णत्वाद्ब्रह्मत्वं बृहत्त्वं व्यापकत्वं बृंहणत्वं शरीरवृष्ट्यादिहेतुत्वमिति विवेकः समष्टिस्थूलशरीरोपाधिकचैतन्यं वि-
विधं राजमानत्वाद्विराट् विश्वेषु समस्तेषु नरेषु अहमित्यभिमानित्वाद्वैश्वानरः विशेषेण भासमानत्वाद्विराज इ-
ति च व्यपदिश्यते समष्टिसूक्ष्मशरीरोपाधिकचैतन्यं ज्ञानशक्तिमत्त्वाद्धिरण्यगर्भः मणौ सूत्रवत्समस्तप्रपंचा-
नुस्यूतत्वात्सूत्रात्मा क्रियाशक्तिमत्त्वात्प्राण इति च व्यपदिश्यते समष्ट्यज्ञानोपाधिकचैतन्यं समस्तप्राणि-
नियामकत्वादीश्वरः समस्तप्राणिहृदयनिष्ठत्वे सति समस्तप्राणिकर्मप्रेरकत्वादंतर्यामी नामरूपरहित-
त्वादव्याकृतः सकलाज्ञानतत्कार्यावभासकत्वाज्जगत्कारणं केनापि प्रमाणेन न व्यज्यते इत्यव्यक्तमि-
ति च व्यपदिश्यते एक एव प्रत्यगात्मा व्यष्टिस्थूलसूक्ष्मकारणशरीरोपाधिकत्वेन विश्वतैजसप्राज्ञ इति
च व्यपदिश्यते एतदेव जीवत्रयमिति व्यवहारः १३ प्रत्यगात्मा शरीरत्रयाधिष्ठाने जीवः साक्षी कूटस्थः

विकारं न प्राप्नोति २

नत्वरतीत्यन्तरः। चित् चैतन्यं चितिरिति पर्यायाः। प्रातिलोम्येनाञ्चतीति प्रत्यक् तथा हि प्रातिलोम्येनान्तर्जड
उः खात्मकाऽहंकारादेर्भोविलक्षणेन सच्चिदानन्दात्मकतयाञ्चति प्रकाशते इति प्रत्यक् तथा चाहंकारो
नात्मा देहो नात्मा इन्द्रियाणि नात्मा इत्येवं निष्कृष्टाहंकारादिचैतन्यं प्रत्यगित्यर्थः। शरीरद्वयोपादानव्यष्ट्यज्ञान
कल्पनाधिष्ठानत्वाच्छरीरत्रयाधिष्ठानं साध्यस्तानां पदार्थानां साक्षात्तद्वृत्तिव्यवधानं विना अपरोक्षेणेक्षते
प्रकाशयतीति साक्षी कूटवन्निर्विकारेण तिष्ठतीति कूटस्थः इति विवेकः। व्यष्टिस्थूलशरीरोपाधिक आत्मा
स्थूलसूक्ष्मकारणशरीरादिसमस्ताभिमानिताहि मः सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरं प्रविष्टत्वाद्विश्वः।
समस्तव्यवहारकर्तृकत्वाद्व्यावहारिकः। चिद्वद् भासमानत्वे सति चिल्लक्षणरहितत्वाच्चिदाभास इति व्यप
दिश्यते। व्यष्टिसूक्ष्मशरीरोपाधिक आत्मा तेजोमयान्तःकरणवृत्तिविशिष्टत्वात्तैजसि वासनायामहंममा
भिमानितयात्मा भवतीति व्युत्पत्तेस्तैजसः। प्रतीतिकालमात्रे विद्यमानत्वात्प्रातिभासिकः। अज्ञानकार्यनि
द्राध्यासकल्पितत्वात्स्वप्नकल्पित इति व्यपदिश्यते। व्यष्ट्यज्ञानोपाधिक आत्मा शरीरद्वयोपादानव्यष्ट्यज्ञान
तत्कार्यावभासकत्वादल्पोपाधितया अनतिप्रकाशकत्वात्स्वरूपचैतन्यप्रधानपुरुषत्वाच्च प्राज्ञः। अव
स्थात्रयानुस्यूततया विद्यमानत्वात् पारमार्थिकः। अविद्याऽहंकारदेहाद्युपाधिपरिच्छिन्नत्वेन भासमानत्वा
देवच्छिन्न इति व्यपदिश्यते। स्थूलसूक्ष्मकारणशरीराणि शरीरत्रयं १४ जाग्रत्स्वप्नसुषुप्त्यवस्था इत्यवस्थात्रयं १५ री
मनोवाक्कायाभिर्विविधकारणानि १६ पुण्यपापमिश्रकर्माणि [illegible] कर्मत्रयं १७ पुण्योत्कर्षपुण्यम
ध्यमपुण्यसामान्यानीति पुण्यकर्मत्रयं १८ पुण्योत्कर्षरूपकर्मणः हिरण्यगर्भशरीरप्राप्तिफलं पुण्यम
ध्यमरूपकर्मणः इन्द्रादिशरीरप्राप्तिफलं पुण्यसामान्यरूपकर्मणः यक्षरक्षादिशरीरप्राप्तिफलं पापो

ग° ४

६।

स्वेच्छाकृतं भिक्षाटनादि समाध्यवस्थायां शिष्यादिभिर्दीयमानमन्नादिकं परेच्छाकृतं समाध्यवस्थायां व्युत्थानदशायां वा आकाशफलपातव दकस्मात् यमानं पाषाणपतनं कंटकवेधादिकमनिच्छाकृतं २०

वे.सं. ४

त्कर्षपापमध्यमपापसामान्यानीति पापकर्मत्रयं १९ पापोत्कर्षस्य परतापकरगुच्छगुल्मवृश्चिकसर्पक
वनमक्षिकादिशरीरप्राप्तिफलं पापमध्यमस्य आम्रपनसनालिकेलमहिष्यश्वगर्दभादिशरीरप्राप्तिफलं
पापसामान्यस्य रोगराजाश्वत्थतुलस्यादिशरीरप्राप्तिफलं मिश्रोत्कर्षमिश्रमध्यममिश्रसामान्यानीति मिश्र
कर्मत्रयं २० मिश्रोत्कर्षस्य निष्कामकर्मानुष्ठानादिनिर्विकल्पकसमाधिपर्यंतयोगयोग्यशरीरप्राप्तिफ
लं मिश्रमध्यमस्य स्वाश्रमोचितकाम्यकर्मयोग्यशरीरप्राप्तिफलं मिश्रसामान्यस्य चंडालव्याधादिशरीर
प्राप्तिः फलं मनोवाक्कायभेदेन कामादिप्रेरितमनोवाक्कायकृतकर्मोत्कर्षादिभेदेन कर्मतत्फलं चानेक
विधमिति ज्ञातव्यं इच्छाप्रारब्धं परेच्छाप्रारब्धमनिच्छाप्रारब्धमिति प्रारब्धत्रयं २१ भूतप्रतिबंधो वर्तमानप्रति
बंध आगामिप्रतिबंधश्चेति ज्ञानप्रतिबंधकप्रतिबंधत्रयं २२ श्रवणमननादिकाले सर्वजंतुवस्तुसाक्षात्
कारोत्पन्नप्रतिबंधः १ पापकर्मजनितः कार्योज्ञेयः एकस्मिन्पुरुषे दयाविश्वासादिदृढाशक्तिजनकोदयः
प्रारब्धशेषः सन्नागामिप्रतिबंधः सन्नजडभरतादिषु प्रसिद्धः संयोगसमवायः आध्यासिकतादात्म्यसंबंधः
इति संबंधत्रयं २२ अथवा कार्यकारणभावः विषयविषयीभावः आधाराधेयभावश्चेति संबंधत्रयं २३ अ
ध्यवापादयोः समानाधिकरण्यपदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति संबंध
त्रयं २ लक्षणेन तत्त्वमस्यादिवाक्यस्थः इदं तत्त्वमसीति वाक्ये संबंधत्रयेणाखंडार्थबोधकं भवति संबंधप
येनामपदयोः समानाधिकरण्यपदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभाव
श्चेति तदुक्तं समानाधिकरण्यं च विशेषणविशेष्यतालक्ष्यलक्षणसंबंधपदार्थप्रत्यगात्मनामिति समाना ४
धिकरण्यसंबंधस्तावत् यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकशब्दस्य एतत्कालविशि

भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः समानाधिकरण्यं २५

143

व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यं तथा च सोऽयं देवदत्त इति वाक्ये एवं अयं शब्दवाच्यो यः सो वेतत्कालेन देशसंबंधविशिष्टो देवदत्तपिंडः अयं स इति तच्छब्दवाच्य
तत्कालतद्देशसंबंधविशिष्टदेवदत्तपिंडो इत्यनेन नियतदेशजीर्णतेन तत्तच्छब्दार्थस्य पदवाच्यार्थेन सह अभेदः व्यावर्तकतया विशेषणानां अयं शब्दार्थस्य व्या
वृत्ततया विशेष्यतया च स इति तच्छब्दवाच्यस्तत्कालतद्देशविशिष्टो देवदत्तपिंडः अयमिति इदंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टो देवदत्तपिंडान्न भिद्य

ष्टदेवदत्तवाचकः यः शब्दस्य चैकस्मिन् पिंडे तात्पर्यसंबंधः तथा तत्त्वमसीति वाक्ये परोक्षत्वादिविशिष्टचैतन्यवा
चकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिन् चैतन्ये तात्पर्यसंबंधः विशेषणविशेष्यभा
वसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चा
न्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः तथात्र तत्त्वमसीति वाक्येऽपि तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्य
स्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः लक्ष्यल
क्षणसंबंधस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनावि
रुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वपरित्यागेना
विरुद्धचैतन्येन सह लक्ष्यलक्षणभाव इयमेव जहदजहल्लक्षणा भागलक्षणेति पर्याय एकांशपरित्यागेनैकांशस्य
ग्रहणं भागलक्षणा उच्यते आध्यात्मिकमाधिभौतिकमाधिदैविकं चेति तापत्रयं २४ अध्यात्ममधिभूतमधिदैव
तमिति यद्वा भूतादित्रयं २५ आरंभपरिणामविवर्ताः कारणत्रयं २६ सत्वरजस्तमांसीति गुणत्रयं २७ भूतभ
विष्यद्वर्तमानकालाः कालत्रयं २८ ब्रह्माविष्णुमहेश्वराः मूर्तित्रयं २९ ज्ञाताज्ञानज्ञेयमिति ज्ञातादित्रयं ३०
एतदेव त्रिपुटीत्युच्यते त्रयाणां पुटानां प्रकाराणां ज्ञात्रादीनां समाहारः त्रिपुटी तथा स्थूलरूपं चः कारणरू
पं चेति प्रपंचत्रयं ३१ पातालमर्त्यस्वर्गाः लोकत्रयं ३२ एतदेव जगत्त्रयमिति चोच्यते संशयासंभावनाविपरी
तभावनाः ज्ञानप्रतिबंधकत्रयं ३३ लोकवासनादेहवासनाशास्त्रवासनाः चेति वासनात्रयं ३४ श्रवणमनन
निदिध्यासनानि श्रवणादित्रयं ३५ संशयनिवर्तकं श्रवणं मननं संभावनानिवर्तकं निदिध्यास
नं विपरीतभावनानिवर्तकमिति विवेकः ज्ञानवैराग्योपरतिश्चेति ज्ञानादित्रयं ३६ इत्स्वरूपका

ज इतियद्रूप
तीयेन संबंध
शब्दवाच्यस्तच्छ
ब्दार्थे निभेदव्या
वर्तकतया विशे
षणत्वेन तच्छब्दा
र्थस्य व्यावर्तक
विशेष्यत्वेन
याचायमेव सः
स एवायमिति
न्योन्यभेदव्या
वर्तकतया संबं
शब्दार्थयोः परस्प
र विशेषणवि
शेष्यभावसंबं
धः २

८ यथा दुग्धमेव दध्याकारविपरिणामस्तेन तथा प्रकृतिप्रधानशब्दवाच्या मायैव जगदाकारपरिणामं गता इति प्रक्रिया सांख्यानाम
ते परिणामवादः यथा वह्नि स्तृणीकासंमिलितो घटो यथा वह्नि तन्तुसमिलितः पटस्तथा वह्नि ... संमिलितं सत् जगज्ज

सं २१

सूक्ष्मप्रपंच ...

नेत्रचिच्छायया सह अहंकारस्य तादात्म्यं तत्सहजं यच्च देहेन सह अहंकारस्य तादात्म्यं तत्कर्मजं यच्च साक्षिणा सह तद्भ्रान्तिजं ... निवृत्तिः संभवति
चिच्छायाऽहंकारयोः सतोर्विद्यमानयोः सहजस्य निवृत्तिर्न भवति सर्वथा ... यथा शरीरोदकनिमित्तोदकस्य ...
स्य शरीरोदकनिवृत्त्या निवृत्तिरित्यर्थः यत्तु शरीराहंकारयोः तादात्म्यं तत्कर्मक्षयान्निवर्तते यच्चात्माहंकारयोः तादात्म्यं तज्ज्ञानान्निवर्तते

वे.सं.
५

योगिदेवादि त्रयं ३७ ज्ञानस्य हेतवः श्रवणादि त्रयं अहं देहेन्द्रियाद्यतिरिक्तः साक्षी प्रतीयमानप्रपंचो मिथ्या इति दृ
ढनिश्चयो ज्ञानस्य स्वरूपं अत्र निश्चयस्य दार्ढ्यं नाम संशयादिराहित्यं अनात्मनि स्वात्मत्वबुद्ध्यभावो ज्ञानस्य का
र्यमिति विवेकः वैराग्यस्य हेतुर्विषयेषु दोषदृष्टिः वान्ताशनवद्धेयताबुद्धिः स्वरूपं पुनरनाशाभावः कार्यमिति
विभावनीयं उपरतेर्हेतुर्यमनियमादिः चित्तनिरोधः स्वरूपं सर्वव्यवहारनाशः कार्यमिति हेतुः स्वरूपकार्याणि
ज्ञानवैराग्योपरतीनां विज्ञेयानि वैराग्यस्यावधिर्ब्रह्मलोकतृणीकारः अज्ञानकाले देहादावात्मत्वविषयिणी
दृढबुद्धिर्यथा तथा तद्प्रतीतिपूर्वकमहं ब्रह्मेति दृढनिश्चयः बोधस्यावधिः सुषुप्तिवत्समस्तवस्तुविस्मृतिरु
परतेरवधिरिति विवृतेयं प्राणनिग्रहोपायाः रेचकपूरककुम्भकाः प्राणायामत्रयं ३८ नेत्रधर्माध्यासाद्यपहृता
सांख्यादि त्रयं ३९ सहजतादात्म्यं कर्मजन्यतादात्म्यं भ्रान्तिजन्यतादात्म्यमिति अहंकारचिच्छायादेहसा
क्षिभिस्तादात्म्यत्रयं ४० पुत्रैषणा वित्तैषणा लोकैषणा चेत्येषणात्रयं ४१ एषणाऽभिमानः सुषुप्तिमूर्च्छासमा
धयः सुषुप्त्यादित्रयं ४२ विषयाशक्तिः १ प्रज्ञामान्द्यं २ कुतर्कः ३ विपर्ययदुराग्रहश्चेति ज्ञाने वर्तमानप्रतिब
न्धकचतुष्टयं ४३ विषये दृढासक्तिर्विषयासक्तिः १ बोधितस्यार्थस्य बुद्ध्याऽग्रहणं प्रज्ञामान्द्यं २ श्रुतिपा
दितस्यार्थस्य विपरीतग्रहणं कुतर्कः ३ अहं श्रोत्रियः पण्डितोऽहं विरक्तोऽहमिति देहेन्द्रियात्मत्वबुद्धिर्विपर्ययदुरा
ग्रहः ४ शमादिषट्केन विषयाशक्तेर्निवृत्तिः श्रवणेन प्रज्ञामान्द्यस्य मननेन कुतर्कस्य निदिध्यासनेन विपर्य
यदुराग्रहस्येति विवेकः धर्मार्थकाममोक्षाः पुरुषार्थचतुष्टयं ४४ जातिगुणक्रियासंबन्धाः शब्दप्रवृत्तिनिमित्तच
तुष्टयं ४५ शब्दप्रवृत्तिनिमित्तानामेषां ब्रह्मण्यसत्त्वेन तस्मिन् शब्दाप्रवृत्तिरिति विभावनीयं ४६ ब्राह्मणक्ष
त्रियवैश्यशूद्रा इति वर्णचतुष्टयं ४६ ब्रह्मचर्याश्रमः गृहस्थाश्रमः वानप्रस्थाश्रमः संन्यासाश्रमश्चेत्याश्रमच

... विशेषविज्ञानराहित्यादिना ऽद्वैतेन धर्मजातेन मूर्च्छावस्थायाः संपन्नतादृश्येन
तिनिश्चलस्वप्राणो भवति इतेनैव सुषुप्तो भवति तत्र विशेषविज्ञानराहित्यादिना ... भवति न जाग्रत्स्वप्नयोः कोऽपि तेनाभावान्न सु
मरणावस्थायां धर्मजातेन कंपादिना ... संपत्तिः ...

वेदितव्यं पंचप्राणा मनो बुद्धिर्दशेंद्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति सप्तदशा
वयवकं लिंगमित्यर्थः एवं ३ चिदाभासाहंकाराभ्यां सहितं पूर्वोक्तं नवदशकं लिंगमिति पक्षांतरं ४ ज्ञानेंद्रियपं
चकं ५ कर्मेन्द्रियपंचकं ५ प्राणादिपंचकं ५ शब्दादिपंचकं ५ मनआदिचतुष्टयमित्येवं चतुर्विंशतितत्त्वा
नीति केचित् ५ पंचीकृतभूतानि पंच ५ शरीरत्रयं अवस्थात्रयं ३ अज्ञानं च पूर्वोक्तैः सह षट्त्रिंशत्तत्त्वा
नीति केचित् ६ षड्भावविकाराः ६ षडूर्मयः ६ षट्कोशिकाः ६ अरिषड्वर्गाः ६ एषणात्रयं ३ गुणत्रयं ३
कर्मत्रयं ३ वचनादिपंचकं ५ संकल्पादिचतुष्टयं ४ मैत्र्यादिचतुष्टयं ४ दिग्वातार्काद्यधिष्ठानदेवताः १४ अ
ज्ञानाधिष्ठानदेवता चेति विज्ञानान्तर्दशसर्वोक्तैः सह षण्णवतिरिति केचित् ।१०। विविदिषासंन्यासो
विद्वत्संन्यासश्चेति परमहंससंन्यासद्वयं २ ज्ञानद्वयपरकमंडलधारीति विद्वत्संन्यासद्वयं २ कर्मनिग्र
होत्पत्ती ग्रहश्चेति निग्रहद्वयं ११ आगामिसंचितप्रारब्धानि कर्मत्रयं १२ प्रारब्धकर्मफलभोक्ता सन्
शरीरेण यत्नेन कृतं पुण्यपापरूपं कर्म आगामीत्युच्यते १ जन्महेतुभूतं स्थितं पूर्वजन्मकृतं कर्म संचितमि
त्युच्यते २ शरीरारंभकं कर्म प्रारब्धमिति भेदः ३ जाग्रज्जाग्रत् १ जाग्रत्स्वप्नः २ जाग्रत्सुषुप्तिरिति जाग्र
त्त्रयं ३ स्वप्नजाग्रत् स्वप्नस्वप्नः २ स्वप्नसुषुप्तिरिति स्वप्नत्रयं १५ सुषुप्तिजाग्रत्सुषुप्तिस्वप्नः सुषुप्तिसु
षुप्तिरिति सुषुप्तित्रयं १६ कुटीचकः बहूदकः हंसः परमहंसश्चेति संन्यासचतुष्टयं १७ ज्ञानात्मा महदा
त्मा शांतात्मा चेति आत्मत्रयं १८ सामान्याहंकारो विशेषाहंकारश्चेति अहंकारद्वयं ॥ ब्रह्मानंदो विष
यानंदो वासनानंदश्चेति आनंदत्रयं ३ १२ निजानंदमुख्यानंदात्मानंदयोगानंदाद्वैतानंदानां ब्रह्मानंदेऽ
न्तर्भावः विद्यानंदस्य विषयानंदेऽन्तर्भावः न तु विदेहपिण्डे शतयायास्तु वासंप्रज्ञातसमाधयेऽन्तर्भावः।
तथाहि प्रमातानं जाग्रज्जाग्रत् शुक्तिरजतादिभ्रमो जाग्रत्स्वप्नः भ्रमादिनाशवीभावो जाग्रत्सुषुप्तिः पर्वस्वप्ने मंत्रादिप्राप्तिः स्वप्नजाग्र

= इदमिष्टमिदं नेति योऽभ्रान्तोपि न सज्जते हितं तत्संन्निवर्तिनं मंसि ह्यर्कं परिचक्षते ६

वे॰ सं॰ २ ५८
चश्रसंप्रत्नान समाधेर्गर्वाप्साद्धिश्चिवबाङ्गिरोपप्रयमाभूमिः १ बालमूकादिश्चिवनिर्मम तेहितीया २ तेद्वाया
मिवाहंकारराहितं तद् तौर्यामेघमाविव मेहतनवराहितं चतुर्थभूमीकेति भूमिकाचतुष्टयं १९ तदेतद्भूमिका
चतुष्टयमभिप्रेत्य शौनेः शौनैरुपरमेदित्युक्तं भगवता अध्यात्मविद्याधिगमः साधुसंगम एव च वासना संपरित्यागः
प्राणः स्पन्दनिरोधनमिति युक्तिचतुष्टयं १८ चित्तलयेप्येकैव युक्तिः साधनमित्यतः पूर्वस्मिन्दार्ढ्याभावे उत्तर
स्मिन्साधने प्रवृत्तिरिति विवेकः श्रीमहत्कषडक पञ्चरंध्रो वपिरपि एव च मन्यस्तु उच्यते भिन्नः षड्विधे तेन संशोध्य
जिह्वादिषट्कं [illegible] नाय यातीत पाषोडशवार्षिकीम् सनवषांच योहद्धा निर्विकार संषडकः इतिषडकलो
[illegible] सोनयोगासनं [illegible] लिनी टेकोत शीलतानिस्पन्दनं समंत्व च समैताने कदंडक इति मोनादि समकं २२ इडा
[illegible] लाचैव सुषुम्नाचतनतः परं गांधारी हस्तिजिह्वा च पूषा चैव यशस्विनी लकुहालम्बुसा चैव शंखिनी दशनाडिके
ति नाडिकादशकं २३ इडाचंद्रनाडी १ पिंगलासूर्यनाडी २ सुषुम्नामध्यनाडी ३ गांधारीदक्षिणनेत्रिका ४ हस्तिजि
ह्वावामनेत्रिका ५ पूषादक्षिणकर्णिका ६ यशस्विनीवामकर्णिका ७ लकुहागुदनाडी ८ लम्बुसामेढ्रनाडी ९
शंखिनी [illegible] भिनाडीति विवेकः हरिब्रह्मरुद्रेन्द्रवरुणापमोऽग्निर्वा पृथिवीसूर्यचन्द्राः क्रमान्नाडीनां देवताः २४ यनी
निस्थि [illegible] नी विनिनी कापिनी माहलि सतिचारिणी वाहिनीत्यष्टानरंगमदाः २५ ज्वले शीलेयने चैव रूपेयो
वनमेव च विपारजंतत प्रीवरस्नेहदिभेदाः २६ पृथिवी सलिलं पावकः शशी पवनो वररविः आत्मा त्वष्ट
मूर्तिमदाः २७ पृथिवी महाविभ्रावे जीवः नमोगुणाभरितः वस्त्रादीच्छावान्भवति सलिलमहाविभ्रावे संसार
भरितः मसेदमावशकमितिचिंतायुक्तो भवति जीवः पावकमहाविभ्रावे कामरसभरितः वनितासंभोगाभ्
भरितः [illegible] ... याचद्वक्तुं तत्कारवान्जीवो भवति शशिमहाविभ्रावे चिंतामरितः कविष्यमाणकार्यं भविष्यति वाहनेचेद
भित्वार्थमतं तयस्य विप्रमूत्रकरणाय चयोजनाः परं याति सर्वं च यथोचितं २ तिष्ठेतोऽमज्जतो वापि यस्य च ह्युर्त्तं तद्वत् चतुर्थो गाभ तद्वमुक्ता
परिव्राट् सोऽयमुच्यते ४ हिताहितं मनोरामं च शोकापदं च यत्क्वचित् नस्पृशाति यः स बधिरः स प्रकीर्तितः ५ सान्निध्ये विषया

वे॰सि॰ ८

यः करचरणसंस्थाविशेषलक्षणानि पद्मकस्वस्तिकादीनि आसनानि इंद्रियाणां स्वस्वविषयेभ्यः प्रत्या
हरणं प्रत्याहारः अद्वितीयवस्तुनि अन्तरिन्द्रियधारणं धारणा दर्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणं सं
कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः विपरीतं ब्रह्मचर्यमनुष्ठेयं
मुमुक्षुभिरिति निष्कर्षः १० रागपूर्वकं स्त्र्यादिविषयकं तानं दर्शनं १ तत्पूर्वकं क्रियाविशेषजन्यं ज्ञानं
स्पर्शनं २ रागपूर्वकं परिहासादिव्यवहारः केलिः ३ स्त्र्यादेरनुरागपूर्वकं सौन्दर्यादिवर्णकीर्तनं ४
रागपूर्वकं रहसि संभाषणं गुह्यभाषणं ५ स्त्र्यादिविषयकोऽहं इच्छाविशेषः इदमस्मिन्निति संकल्पः ६
अनुपारमेश्वरतां तत्स्वयं अध्यवसायः ७ रागपूर्वकं स्त्र्यादिविषयकानुभवविशेषः क्रियानिर्वृत्तिः
८ ज्ञानं ज्ञाता ज्ञेयं भोक्ता भोग्यं भोगः कर्ता करणं क्रियेत्येकः एवं नवविधः संसारः १० एतान्येव च
तथा हि पंचमहाभूतानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च प्राणादिपंचकं मनआदिचतुष्टयं स्थूल
शरीरमेकं त्रिविधकर्माणि अवस्थात्रयं एतेषां कारणीभूतमज्ञानं चेति नवविधः संसारः ११ दिग्वातार्क
बेजापतिः प्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः इत्यपि स्थाने देवताः पंचदश
कं ११ अस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्मपुरीषविकाविण्मूत्रकफवातपित्तान्यस्थादि
पंचदशकं १२ एतन्मध्ये षट्समुदायात्मकं स्थूलशरीरमिति ज्ञातव्यं रागो द्वेषः कामक्रोधलोभमोहमद
मात्सर्येर्ष्यासूयादंभदर्पाहंकारेच्छाभक्तिश्रद्धा इति रागादिषोडशकं १३ एतेषामध्ये भक्तिश्रद्धेच्छे
ति हेतुः इच्छा तु सा क्रियते न वेन्यहेतुश्च भवति अन्येषां यत्नेन इति विवेकः कर्मेन्द्रियपंचकं ५ ज्ञाने
न्द्रियपंचकं ५ प्राणादिपंचकं ५ अन्तःकरणं चेति षोडशकं लिङ्गमित्येके २ इदमेव सूक्ष्मशरीरमिति ८

यन स्वजनादिनिमित्त उत्सेकः उत्सेको मदो महद्दवणाद्गुणादेतः २

ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता। १ विचारणा द्वितीया स्यात्तृतीया तनुमानसा। सत्त्वापत्तिश्चतुर्थी स्या
त्ततोऽसंसक्तिनामिका। पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृतेति सप्तभूमिकाः॥ ४ ३ भूमिकानामचित्तस्य प्र
वस्थाविशेषाः। अत्र भूमिकात्रितयं ब्रह्मविद्यासाधनमेव न तु ब्रह्मविद्याकारावेन भावः। भेदसत्त्वं तु बुद्धेरति ह
नत्वात्। यश्च तुरीयभूमिकाप्राप्तः स ब्रह्मविदित्युच्यते। १ पञ्चमभूमौ निर्विकल्पात्तदा स्वयमेव व्युत्तिष्ठति सोऽयं यो
गी ब्रह्मविद्वरः। २ षष्ठभूमौ पार्श्वस्थबोधितो व्युत्तिष्ठति सोऽयं ब्रह्मविद्वरीयान्। ३ तदेतद्भूमिद्वयं सुषुप्तिरिति
चाभिधीयते। अत्र संप्रज्ञातः [illegible] त्रिपादकानि योगशास्त्राणि सप्तमभूमिकाप्राप्ते योगी नैव पर्यवस्यति। सोऽयमीह
ग्राह्ययोगी शून्यानवहितः। निर्विकल्पकसमाधिस्थः परमहंसः सप्तमभूमौ ब्रह्मविद्वरिष्ठ इति चोच्यते। ६
ज्ञानेन्द्रियाणि [illegible] पञ्च तथा पञ्च कर्मेन्द्रियाणि मनश्चात्र च तथा पञ्च प्राणादि पञ्चकमथाविपदादि
७ केकाम अस्थि कर्म च तमः पुनः शृथा शरीरमिति पुर्यष्टकं १७ कामोऽभिलाषः कर्म च त्रिविधं तमः तत्त्वज्ञानं पततेषा
पुर्यष्टकमिति संज्ञितमिभावः। १८ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधे
ति प्रकृत्यष्टकं। १५ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः अष्टाङ्गानि निर्विकल्प
कसमाधेरिति केचित्। १६ अस्मिन्पक्षे अष्टाङ्गघटकसमाधिशब्देन सविकल्पकाख्यसंप्रज्ञातसमाधिरुच्यते
संप्रज्ञातसमाधेरेतान्यष्टाङ्गानीति केचित्। अस्मिन्पक्षे अङ्गघटकसमाधिः संप्रज्ञातानाङ्गिन इत्यङ्गीकर्तव्यं।
अङ्गाङ्गिनोर्भेदस्यावश्यकत्वात्। तथा च विच्छिन्नविच्छिन्नप्रत्ययावृत्तिः ध्यानं सा च ध्यानेन अविच्छिन्नावि
च्छिन्नप्रत्ययावृत्तिरूपघटितः संप्रज्ञातनामा समाधिः निरुत्थाने नाविच्छिन्ना विच्छिन्नप्रत्ययावृत्तिः अ
तिसूक्ष्मसंप्रज्ञातनामा साध्यसमाधिरिति भेदः त्रयाणां विषये कोऽपि चित्तपरिपाकतारतम्येनाङ्गीकरणी। म० यो० ८ ॥
॰भूम्यादिः शरीरः पञ्चगव्यादि तन्मात्राण्युच्यन्ते मन इति मनः कारणमहंकारो [illegible] तेन बुद्धिरित्यहंकारकारणं महत्तत्त्वं अहंकारः त्वविद्यात्मक

वे. सं.

वान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये ३ यः सम्पद्यते इत्यादिश्रुत्या प्रतिपादनं फलं ४ प्रकरणप्रतिपाद्यस्योत त
मादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यादिश्रुत्या प्रशंसनमर्थवादः स्वार्थतात्पर्याभावा
त् ५ यथा मृज्जन्यघटशरावादीनां मृदभिन्नत्वं स्वर्णजन्यकटकमुकुटादीनां स्वर्णाभिन्नत्वं तथा कारणजन्यजगतः
कारणाभिन्नत्वमिति वाचारम्भणमित्यादिश्रुत्या प्रतिपादितोपपत्तिः ८ शिशुत्वबाल्ययौवनकौमारता
रुण्यवार्द्धिकानि षडवस्थाः ८२ पूर्वमीमांसोत्तरमीमांसाशब्दतर्कसांख्ययोगाः षट्शास्त्राणि ८३ आश्वला
यनापस्तम्बबौधायनकात्यायनसत्याषाढीवैखानसाः षट्सूत्राणि ८४ शिक्षाकल्पव्याकरणनिरुक्तज्योति
षच्छन्दांसि षडङ्गानि ८५ स्नानसन्ध्याजपहोमदेवतार्चनातिथ्यपूजनवैश्वदेवाः षट्कर्माणि ८६ पूर्वोक्तप्रमाण
चतुष्टयमनुपलब्धिरन्यथानुपपत्तिरिति षट्प्रमाणानि ८७ शमोदमउपरतिस्तितिक्षासमाधानं श्रद्धे
ति शमादिषट्कं ८८ अज्ञानमावरणं विक्षेपः परोक्षमपरोक्षं अनर्थनिवृत्तिरानन्दावाप्तिश्चेति सप्तावस्था ८९
आवरणं हि द्विविधं न भाति कूटस्थ इत्यभानावरणं १ अतो भानं नास्ति कूटस्थ इत्यसदावरणमिति २ परोक्षज्ञा
नादसदावरणनिवृत्तिः अपरोक्षज्ञानादभानावरणनिवृत्तिः ततो विक्षेपनिवृत्तिः अतोऽनर्थनिवृत्ति
रानन्दावाप्तिश्च भवतीति विभावनीयम् शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव प्रमाता च प्रमाणं च प्रमेयं च फलं तथा।
इति सप्तविधं शास्त्रे अभिधीयते व्यवहारे इति सप्तविधचैतन्यं ९० मायोपाधिविनिर्मुक्तं शुद्धमित्यभिधीयते माया
संबन्धतः स ईशो जीवोऽविद्यावशस्तथा अन्तःकरणसंबन्धात् प्रमातेत्यभिधीयते तथा तद्वृत्तिसंबन्धात् प्रमाणमि
ति कथ्यते अज्ञातमपि चैतन्यं प्रमेयमिति कथ्यते तथा ज्ञातं च चैतन्यं फलमित्यभिधीयते भूर्भुवः स्वर्महर्जनस्त
पः सत्यमिति भूरादिसप्तकं ९१ अतलवितलसुतलतलातलमहातलरसातलपातालान्यतलादिसप्तकं ९२

अथवा दृश्य सूर्यादिकस्य दृश्यासाक्षी अनुसूतोहमिति दृश्यानुविद्धसविकल्पकसमाधिः ४ सूर्यादिकादसंगोहमिति शब्दानुविद्धः ५
एतदुभयविकल्पास्फुरणं निर्विकल्पकसमाधिः ६ ०

निवर्तनीयः ४ स्वर्णकटकलोहखड्गादिदृष्टान्तेन कारणादिन्नत्वेन प्रतीयमानप्रपंचस्यासत्यत्वभ्रमो निवर्तनीयः ५
इति पंचभ्रमनिवर्तकदृष्टान्तपंचकं ७ रज्जुत्वार्णि जगतः भ्रान्त्या प्रतीयत इत्यत्र प्रश्नेकोरजतेरजौ सर्पः स्थाणौ पुरुषः गगन
नैनीलतादिमरीचिकायां जलमिति दृष्टान्तपंचकं १० आत्मख्यातिरसत्ख्यातिरख्यातिरन्यथाख्यातिरनिर्वचनीय
ख्यातिश्चेति पंचख्यातयः ११ ४ एकरसवस्तुमात्रेतेन चित्तस्य तदाकारवृत्तिविशेषावस्थानं संप्रज्ञातसमाधिः
सवसविकल्पक इति चोच्यते स च मुनः दृश्यानुविद्धः शब्दानुविद्धश्चेति द्विविधः दृश्यमिश्रो दृश्यानुविद्धः १ शब्दमिश्रः
शब्दानुविद्धः इति विवेकः वृत्तिमपि अवलेकरसमात्रतेनापसंदन्नवृत्तिमतश्चित्तस्य प्रयत्नपूर्वकं वस्तुमात्रेनावस्थानं
असंप्रज्ञातसमाधिः स एव निर्विकल्पक इति च गीयते दृश्यानुविधशब्दानुविधनिर्विकल्पकसमाधयः एववाह्याभ्यं
तरभेदेन षट्समाधयः इति व्यवह्रीयते १६ कामक्रोधलोभमोहमदमात्सर्याणि अरिषड्वर्गः १७ अस्तिजायतेवर्ध
ते विपरिणमते अपक्षीयते नश्यतीति षट्भावविकाराः १८ त्वङ्मांसरुधिरमेदोमज्जास्थीनि षट्कौशिकाः १९ जराम
रणत्वङ्नपिपासाशोकमोहाः षडूर्मयः २० उपक्रमोपसंहारावभ्यासोपूर्वता फलं अर्थवादोपपत्तिश्च लिंगं तात्पर्यनि
र्णये इति षड्विधलिंगानि २१ उपक्रमोपसंहारावेकं लिंगं अद्वितीयात्मप्रतिपादकत्वात् स्फुटः एवं नामरूपरहित
सन्मात्रमिदं जगदिति छान्दोग्योपनिषद् प्रपाठक प्रकरणे सदेवसोम्येदमग्र आसीदिति श्रुत्या प्रतिपादनमुपक्रमः
प्रतीयमानं सर्वमिदं जगत् ऐतदात्म्यस्वरूपमेव नान्यदिति एतदात्म्यमिदं सर्वमिति श्रुत्यान्ते प्रतिपादनमुपसंहारः १
प्रकरणप्रतिपाद्यस्य तत्त्वमसीति नव संख्याकोपदेशेन प्रतिपादनमभ्यासः २ प्रमाणान्तरामेयलक्षणयात
तौपनिषदं पुरुषं पृच्छामीत्युपनिषन्मात्रेण गम्यस्यात्मनेतरेणानि विवेकः अपूर्वता प्रारब्धक्षयपर्यंतं देहेंद्रिया
दौ मिथ्याप्रतीतिः प्रारब्धस्य तिः शेषनाशप्राप्तेतदप्रतीतिपूर्वकं अद्वितीयात्मस्वरूपेणावस्थानस्याचार्य
४ अख्यातिमतं सांख्यप्रभाकरयोः अन्यथाख्यातिमतं नैयायिकवैशेषिकयोः आत्मख्यातिमतं विज्ञानवादिनः असत्ख्यातिमतं शून्यवादिनः ५ अनिर्वचनीयख्यातिमतं वेदान्तवादिनः ७५ ॥ ४ ॥

एवं निर्विकल्पक इति चोच्यते
...न विद्धः ॥

वे॰सं॰ ५

तानि पृथिव्यप्तेजोवाय्वाकाशानि पंचस्थूलभूतानि ५७ अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः पंचयमाः ५८ शौच
संतोषतपःस्वाध्यायेश्वरप्रणिधानानि पंचनियमाः ५९ क्षिप्तमूढविक्षिप्तैकाग्रनिरुद्धमिति पंचभूमयः ६० आसु
रसंपल्लोकशास्त्रदेहवासनारूढत्वेनाशान्तचित्तं क्षिप्तभूमिका १ निद्रातन्द्रादिग्रस्तं चित्तं मूढभूमिका २ कदाचिज्ज्ञान
युक्तं चित्तं कदाचिद्विक्षिप्ततया विक्षिप्तभूमिका ३ तत्राद्यमूढयोः समाधिशंकैव नास्ति विक्षिप्तमेव समाधिना
शकान्तदिनरत्नभूमिद्वयं समाधिः एकाग्रे मनसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्लथय
ति निरोधमभिमुखं करोतीति संप्रज्ञातो योगः एकाग्रभूमिका ४ सर्ववृत्तिनिरोधरूपासंप्रज्ञातसमाधिनिरुद्धभू
मिका ५ नित्यप्रलयः १ आवान्तरप्रलयः २ दैनंदिनप्रलयः ३ ब्रह्मप्रलयः ४ आत्यन्तिकप्रलयः ५ चेति पंचप्रल
यः १ प्राणिनां सुषुप्तिर्नित्यप्रलयः १ चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते इति ब्रह्मणः एकस्मि
न्नहनि चतुर्दशमनूनां चतुर्दशेन्द्राणां वाधिपत्ये एकस्यायनेऽन्यस्य प्राप्ते सति अधिपत्यान्तकालपर्यन्तनासि
न्समये चतुर्दशावान्तरप्रलया इत्युच्यन्ते तेषां नैमित्तिकप्रलय इति संज्ञा मन्वन्तरप्रलय इति १ एते युगप्रल
यानामन्तर्भावः २ ब्रह्मणः सुषुप्तिर्दैनंदिनप्रलयः ३ ब्रह्मणो नाशावस्था ब्रह्मप्रलयः ४ तदानीमाकाशा
दिप्रपंचरहितं सज्ज्ञानमात्रं वर्तते ब्रह्मप्रलयस्य महाप्रलय इति संज्ञा प्राकृतप्रलय इत्यपि इति ४ ब्रह्मज्ञाव
स्था आत्यन्तिकप्रलयः ५ तत्समयेऽज्ञानस्य सर्वात्मनाभावः इति प्रपंचप्रलयाः ६१ आत्मनि प्रतीयमान
कर्तृत्वादिधर्मवत्त्वं १ शरीरत्रयावच्छिन्नात्मसंगी २ जगत्कारणत्वेन ब्रह्मणो विकारित्वं ३ कारणाद्भिन्नस्य प्रपंचस्यस
त्यत्वमिति प्रपंचभ्रमाः बिंबप्रतिबिंबदृष्टान्तेन भेदभ्रमो निवर्तनीयः १ स्फटिकलोहितदृष्टान्तेन पारमार्थिककर्तृत्व
भ्रमो निवर्तनीयः २ घटाकाशदृष्टान्तेन संगीतिभ्रमो निवर्तनीयः ३ रज्जुसर्पदृष्टान्तेन जगत्कारणे ब्रह्मणि विकारित्व
सत्त्वरजस्तमोगुणात्मिकाः शान्तिघोरमूढवृत्तयः तत्र शान्तिः स्वभेदाः पैशुन्यचौर्य कामक्रोधलोभमदमात्सर्यमोहा इति एतासां
वृत्तीनां हृदयस्फुरणं तद्रष्टा ताटस्थ्येन स्वतोऽहमिति दृश्यानुविद्ध आन्तरीयसविकल्पकसमाधिः १ (हृत्तीनां चित्तस्थानां

(आनन्दमयदृश्यानुविद्धः)

प्रमे॰ ५

४० जीवात्मापरमेश्वराद्भिन्नः १

साधनचतुष्टयसंपन्नप्रमाता जीवोऽधिकारी विषयो जीवब्रह्मैक्यं ... चेत प्रमेयं ... नानां तात्पर्यात् सर्वं यत्तत्तदेकप्रमेयस्य तत्प्रति
साधनचतुष्टयसंपन्नप्रमाता जीवोऽधिकारी विषयो जीवब्रह्मैक्यं ... प्रयोजनं तत्तदेकप्रमेयगताऽज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च ॥८॥ ॥५॥
पादकोपनिषत्प्रमाणस्य च वोध्यवोधकभावलक्षणः

तुष्टयं ४० नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिः मुमुक्षुत्वं चेति साधनचतु
ष्टयं ४१ विषयप्रयोजनसंबंधाधिकारिणः अनुबंधचतुष्टयं ४२ मनोबुद्ध्यहंकारचित्तान्यंतःकरणचतुष्टयं ५०
ष्टयं ४८ विषयप्रयोजनसंबंधाधिकारिणः अनुबंधचतुष्टयं ४९ संकल्पादिचतुष्टयं ५१ संकल्पवृत्तिरूपेण परिणतमंतःकरणं मनः मनना
संकल्प्याध्यवसायाभिमानानुसंधानानि संकल्पादिचतुष्टयं ५१ संकल्पवृत्तिरूपेण परिणतमंतःकरणं बुद्धिः निश्चयात्मिका वा बु
त्मकं वा मनः संकल्पवृत्तिहेतुर्वा मनः १ निश्चयात्मवृत्तिरूपेण परिणतमंतःकरणं बुद्धिः निश्चयात्मिका वा बु
द्धिः निश्चयहेतुर्वा बुद्धिः २ अभिमानवृत्तिरूपेण परिणतांतःकरणमहंकारः अभिमानात्मको वाभिमानको वा
... चित्तमनुसंधानात्मकं वा अनुसंधानकरं वा ४ ऋग्यजुःसामाथ
वा ३ सर्वेंद्रियानुसंधानरूपवृत्तिमदंतःकरणं चित्तमनुसंधानात्मकं वा अनुसंधानकरं वा ४ ऋग्यजुःसामाथ
र्वणवेदाः वेदचतुष्टयं ५३ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणचतुष्टयं ५४ लयविक्षेपकषायरसास्वादाः
समाधिविघ्नचतुष्टयं ५४ मैत्रीकरुणामुदितोपेक्षा मैत्र्यादिचतुष्टयं ५५ जरायुजांडजस्वेदजोद्भिज्जानि भूतया
समाधिविघ्नचतुष्टयं ५४ मैत्रीकरुणामुदितोपेक्षा मैत्र्यादिचतुष्टयं ५६ ब्रह्मविद्वरवरीयोवरिष्ठा इति ब्रह्मविदादिचतुष्टयं ५७ अन्नमयप्राणमयमनोमयविज्ञानमया
मचतुष्टयं ५६ ब्रह्मविद्वरवरीयोवरिष्ठा इति ब्रह्मविदादिचतुष्टयं ५७ अन्नमयप्राणमयमनोमयविज्ञानमया
नंदमयाः पंचकोशाः ५८ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि ज्ञानेंद्रियपंचकं ५९ शब्दस्पर्शरूपरसगंधाः शब्दादिपंच
कं ६० वाक्पाणिपादपायूपस्थाः कर्मेंद्रियपंचकं ६१ वचनादानगमनविसर्गानन्दाः वचनादिपंचकं ६२ प्राणापा
नव्यानोदानसमानाः पंचप्राणाः ६३ नागकूर्मकृकलदेवदत्तधनंजयाः पंचोपवायवः ६४ नित्यनैमित्तिकप्रा
यश्चित्तकाम्यनिषिद्धानि कर्मपंचकं ६५ नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि १ नैमित्तिका
नि पुत्रजन्मादिनिमित्तजातेष्ट्यादीनि २ प्रायश्चित्तानि पापक्षयसाधनानि कृच्छ्रचांद्रायणादीनि ३ काम्यानि
स्वर्गादिसाधनानि ज्योतिष्टोमादीनि ४ निषिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्महत्यादीनि ५ इति विवेकः ५
शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्र रूपतन्मात्र रसतन्मात्रगंधतन्मात्राणि सूक्ष्मभूतानि पंचकं ६६ पंचीकृ

त्यानन्दास्वादनं वा ॥ मैत्र्याद्यर्थपतंजलिनासूत्रितं तदेवाह मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्त
सादनं तत्र सर्वप्राणिषु सुखसंभोगापन्नेषु मैत्रीं भावयेत् दुःखितेषु करुणां पुण्यात्मकेषु मुदितां पुण्यशीलेषु उपेक्षां ... भावयेत् ... कृपाय

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

38

[illegible]

[illegible]

[illegible]

[illegible]

46

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

.. ढकें यें कश्रुत्वामि, निवेद्य निजवलु, राज्ञसु... इति एवं वशिष्ठ... सर्गः ॥ ... श्रीरामस्य मित्र... नाम ... सर्गः ॥

वैराग्यमिव महापारनिष्पन्नो नाम सर्गः ॥ १ ॥ श्रीवाल्मीकिः ॥ ... ... रामाय ... ...
... १ ... ... २ ...
५६ ... ... ३ ... ...
मलेभरः ४ ... विशालां ... ... ५ कपिल ... ...
... ... महापारि ... वमः ६ ... ...
... ... पमः ७ ... ... ८ एवं ... ...
... ... ९ ... ... १०
... ... ११ ... ...
... ... १२ ... ... १३ ...
... ... १४ ... ...
... ... १५ ॥ वैराग्ये ... नाम सर्गः ॥ २ ॥
श्रीवाल्मीकिः ॥ ... ... १ ... ...
... ... २ ... ... विश्वामित्र ... ...
... ३ ... ... किल ... ... ४ ... ...
... ... ५ ... ... विश्वामित्र ... ...
... ६ ... ... ७ ... ...
... ... ८ ... ... विश्वामित्र ... ...
... ... ९ ... ...
... ... १० ... ... ११
... ... विश्वामित्र ... ... १२ ... ...

[illegible]

[illegible]

[illegible]

60